International Journal of Sanskrit Research 2022; 8(2): 258-261

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(2): 258-261
© 2022 IJSR
www.anantaajournal.com
Received: 05-01-2022
Accepted: 11-02-2022

**श्रीखेमलाल शर्मा**
सहायकाचार्यः व्याकरणविभागः
सरकारी-संस्कृत-महाविद्यालयः,
साम्दोङ्ग पूर्वसिक्किमः, भारत

**Corresponding Author:**
**श्रीखेमलाल शर्मा**
सहायकाचार्यः व्याकरणविभागः
सरकारी-संस्कृत-महाविद्यालयः,
साम्दोङ्ग पूर्वसिक्किमः, भारत

# पाणिनिनेपालीव्याकरणयोः सम्प्रदानकारकस्य मूल्यत्वं

**श्रीखेमलाल शर्मा**

**सारांशः-**
व्यावहारिकदृष्ट्या नेपालीव्याकरणस्य उपजीव्यत्वं पाणिनिव्याकरणमिति भजति। पाणिनिव्याकरणे सम्प्रदानकारके त्रयो भेदाः। नेपालीव्याकरणे च भेदद्वयम्। अनयोः समानं भिन्नत्वम्, एषु विषयेषु चर्चा अस्मिन् लेखे विद्यते। यथा- पाणिनिव्याकरणस्य सम्प्रदानकारकस्य निम्नलिखितभेदाः-

१. अनिराकर्तृ- सूर्याय अर्घ्यं ददाति।
२. प्रेरयितृ- विप्राय गां ददाति।
३. अनुमन्तृ- उपाध्यायाय गां ददाति। इति

नेपाल्यां भेदद्वये प्रेरकः अप्रेरकश्च। प्रेरकः येन यस्मै ददाति वा मत्कृते एवं करोतु इति वदति, स प्रेरकः।

**प्रेरकः -** धनिकः दीनाय द्रव्यं ददाति।

**परिचयः-**

यमभिलक्ष्य वा देवमभिलक्ष्य अर्पयति, स अप्रेरकः। अत्र स्व सत्त्वस्य निवृत्तिरपि भवति। उदाहरणम्- भक्तो देवाय नैवेद्यं ददाति। अप्रेरकसम्प्रदाने कर्ता तद्धनस्य सम्प्राप्तिरिच्छां न करोति। नेपाल्यां सम्प्राप्तिरिच्छा अस्ति चेत् तत्रापि चतुर्थी भवत्येव। पाणिनिव्याकरणं परिष्कृततमं वर्तते। नेपालीव्याकरणस्य वाक्यप्रयोगस्य विषयः परिवर्तनशीलो वर्तते तथापि अत्र नेपालीव्याकरणस्य सैद्धान्तिकपक्षः पाणिनिव्याकरणस्य सैद्धान्तिकपक्षम् अङ्गीकरोति। एतदर्थम् अत्र अनयोः मूल्यत्वं सर्वेषां पाठकानाङ्कृते उपयोगी भवति।

संप्रदानकारक प्रतिपादने सूत्रकारः पाणिनि प्रतिपायति संप्रदानसंज्ञाविधायकं सूत्रमिदम्। यथा – कर्मणा यमभिप्रैति स सम्प्रदानम् १-४-३२ अष्टाध्यायी-सिद्धान्तौ इयं व्याख्या वर्तते दानस्य कर्मणा यमभिप्रैति स संप्रदानसंज्ञः स्यात्। सिद्धान्तकौमुदी परमलघुमञ्जुषायां संप्रदानस्य इयं परिभाषा वर्णितो वर्तते। क्रियामात्रकर्म क्रियायामुद्देश्यं यत्कारकं तत्वं सम्प्रदानत्वम्। [1] धात्वर्थप्रधानीफूतकर्मसम्बन्धाय क्रियायामुद्देश्यभूतमर्थमुद्दिश्य कर्म क्रियते तत्कारकं संप्रदानमिति । सम्प्रदानम् किं लक्ष्मीटीकायां प्रोक्तं यत् सम्यक् प्रदीयतेस्मै तत्संप्रदानमिति। [2]

उक्त यत् दानस्येति। अत्र दानक्रियाकर्मणा यमभिप्रैति इच्छति संबध्नाति ईप्सति वा तत् कारकं संप्रदानसंज्ञकम्। अतैव अत्र न स्यात् अजां नयति।

१. हस्तं विदधाति वृत्ते. इत्यत्र नातिप्रसङ्गः। दानस्य अर्थो भवति स्वस्वत्वध्वंसपूर्वकपरसत्वोत्पत्त्यानुकूलव्यापाररूपम्। अथवा स्वसत्वे निवृत्तिपूर्वकं परसत्वोत्पादनं दानम्। अतैव "संप्रदाने चतुर्थी" २.३.१३ इदं सूत्रे संप्रदानार्थे चतुर्थ्या विभक्त्या ङे भ्याम्, भ्यस् भवन्ति।

उदाहरणानि –

१. शिस्याय शास्त्रमुपदिशति
२. विप्राय गां ददाति।
३. दानीयो विप्र इत्यत्र विप्रशब्दान्न चतुर्थी।

"कृतल्युटो बहुलम्" २.३.१३ इति सूत्रेण बहुल ग्रहणात् संप्रदाने अनीयर प्रत्ययो भवति। दानोद्देश्य इति। तेन कृत्प्रत्ययेन संप्रदानस्य विप्रस्याभिहितत्वात् चतुर्थी विभक्ति न भवति।

**२. दानीय विप्रः।**

अत्र "दानस्यकर्मणा यमभिप्रैति संप्रदानम्" इति स्वीकृयते चेत् पत्ये शेते इत्यत्र शिङ् श्वप्ने इति धातोः कथं संप्रदानत्वम् इति चेत् न "क्रियाग्रहणमपि कर्तव्यम्" वार्तिकमस्ति यत् – अकर्मकधातुर्योगे "क्रियया यमभिप्रैति सोऽपि संप्रदानम्" इति वार्तिकग्रहणाद् पत्ये शेते इत्यत्र नापत्ति।

अत्र "दानस्यकर्मणा यमभिप्रैति संप्रदानम्" इति स्वीकृयते चेत् पत्ये शेते इत्यत्र शिङ् श्वप्ने इति धातोः कथं संप्रदानत्वम् इति चेत् न "क्रियाग्रहणमपि कर्तव्यम्" वार्तिकमस्ति यत् – अकर्मकधातुर्योगे "क्रियया यमभिप्रैति सोऽपि संप्रदानम्" इति वार्तिकग्रहणाद् पत्ये शेते इत्यत्र नापत्ति।
उपर्युक्तवार्तिकस्योदाहरणं वर्तते।

१. युद्धाय सन्नध्यते।
२. श्राद्धाय निगर्हते।
३. यच्छ्रेयः स्यान्निश्चितं ब्रुहि तन्मे। [3]
४. धृतराष्ट्रात्मजं तस्मै भीमसेनाय धीयते।

शयानं सलिले सर्वे कुपयामो धनुर्भृते।। [4]
तत्संप्रदानञ्च त्रिविधम्।
अनिराकरणात् कर्तुस्त्यागाङ्गं कर्मणेप्सितम्।
प्रेरणानुगतिभ्याञ्च लभते सम्प्रदानताम्।। [5]

१. अनिराकर्तृ
२. प्रेरयितृ
३. अनुमन्तृ

तत्र अनिराकर्तृ अस्योदाहरणम् – सूर्याय अर्घ्यं ददाति।
प्रेरयितृ विप्राय गां ददाति।
अनुमन्तृ उपाध्याय गां ददाति।

प्रथमे वाक्ये नात्र सूर्यः प्रार्थयते, नानुमन्यते न निराकरोति। द्वितीये वाक्ये विप्रेण मह्यं गां देहि, इति पूर्वं प्रवर्तितो राजा तस्मै गां ददाति। अत्र पूर्वव्यापारप्रेरकत्वं विप्रे।
तृतीयेऽस्मिन् वाक्ये यमुद्दिश्य गां ददाति इति।
संप्रदानसंज्ञा सर्वत्र तु नैव पाणिनि सूत्रस्य निर्दिष्टे स्थानेव भवति। यथा –यजेः कर्मणः करणसंज्ञा सम्प्रदानस्य च कर्मसंज्ञा। [6]
उदाहरणम् – पशुना रूद्रं यजते।
पशुं रुद्राय ददाति।

अग्रे सम्प्रदानं विधातव्यमिति उरिकृत्य सूत्रकार सूत्रं निर्माति – "रूच्यर्थानां प्रियमाणः" १.४.३३। रूच्यर्थानां धातूनां प्रयोगे प्रियमाणोऽयं संप्रदानं स्यात्।
उदाहरणम् –

१. हरये रोचते भक्तिः। इत्यत्र भक्तिः स्ववि। यां प्रीतिं हरौ जनयतीत्यर्थः इति शाब्दबोधो भवति।

पाणिनिव्याकरणानुसारं सिद्धान्तकौमुद्यां कारकप्रकरणं सूत्रेदं वर्तते। "स्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः" अस्मिन् सूत्रे श्लाघृ कत्थने, ह्नुङ् उपनयने, ष्ठा गतिनिवृत्तौ, शप् उपालम्भे एतेषां धातूनां प्रयोगे बोधयितुमिष्टः संप्रदानसंज्ञको भवति।
उदाहरणम् – गोपी स्मरणात् कृष्णाय श्लाघते।
अस्मिन् सूत्रे ज्ञीप्स्यमानं पदोल्लेखो वर्तते नो चेत् देवदत्तस्य श्लाघते पथिः। अत्र पथि इत्यस्यापि संप्रदानत्वात् चतुर्थी न स्यात्, एतदर्थं ज्ञीप्स्यमान अस्यैव स्यात्।

१. धारेरूत्तमर्णः १.४.३५
२. स्पृहेरीप्सितः १.४.३६
३. क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः १.४.३७
४. राधीक्ष्योर्यस्य विप्रश्नः १.४.३९

१. भक्ताय धारयति मोक्ष हरिः।
२. पुष्पेभ्यः स्पृहयति।
३. हरये क्रुध्यति।
४. कृष्णाय राध्यति।

सिद्धान्तकौमुद्याम् अनुपुर्वस्य प्रतिपूर्वस्य (गृ धातुनां योगे पूर्व) गृणातेः कारकं पूर्वव्यापारस्य कर्ता यदस्ति तस्य संप्रदानसंज्ञा भवति। सूत्रेदमस्ति "अनुप्रतिगृणश्च" १.४.४१। सूत्रेस्मिन् पूर्वस्य कर्ता इत्यस्यानुवृत्तिः वर्तते। अस्यार्थो भवति अनुपूर्वस्य प्रतिपूर्वस्य च गृणातेः कारकं पूर्वस्याः क्रियया कर्तृभूतं संप्रदान संज्ञं भवति।
उदाहरणम् –

१. होत्रेऽनुगृणाति।
२. होत्रे प्रतिगृणाति।

(जुहोति इति- होता, तस्मै प्रथमं होता मन्त्रोच्चारणं करोति) तस्मै अनुशंसति। [7]
ऋत्विकः चत्वारः – होता, उत्गाता, अध्वर्यु, ब्रह्मा।
पाणिनिना उदिरितमिदंसूत्रम् "परिक्रयणे सम्प्रदानमन्यतरस्याम्" १.४.४४। अत्र अन्यतरस्यां क्वचित् प्रवृत्ति क्वचिदप्रवृत्ति इति क्रियार्थे वर्तते धनं अन्नाद्यर्पयणेनात्यन्तिकस्वीकरणम् इति। [8]
उदाहरणाम् –

१. शताय परिक्रीतः।
   तादर्थ्ये चतुर्थी वाच्या वार्त्तिक। [9]
२. मुक्तये हरिं भजति।
   क्लपिसंपद्यमाने च [10]
३. भक्तिज्ञानाय कल्पते।
   उत्पातेन ज्ञापिते च
४. वाताय कपिला विद्युत।
   हितयोगे च
५. ब्रह्मणाय हितम्।
   क्रियार्थोपपदस्य च कर्मणि स्थानिनः २.३.१४

अस्यार्थो घटति क्रियार्था क्रियोपपदं यस्य - सोऽयं क्रियार्थोपपदं क्रियार्थोपपदस्य च स्थानिनोऽप्रयुज्यमानस्य धातोः कर्मणि कारके चतुर्थी विभक्ति भवति।
उदाहरणानि –

१. एधेभ्यो ब्रजति।
२. पुष्पेभ्यो ब्रजति।
३. फलेभ्यो याति।
४. नमस्कुर्मो नृसिंहाय।

क्रियार्थोपदस्यैव स्यात् नोचेत् १. प्रविश पिण्डम् इत्यत्र दशावतारर्वणनमेकेन पद्येनात्र प्रदश्यते

देदानुद्धरते जगन्ति वहते भूलोकमुद्बिभ्रते।
दैत्यं दारयते बलि छलयते क्षत्रक्षयं कुर्वते।
पौलस्त्यं जयते हलं कलयते कारूण्यमातन्वते
म्लेच्छान् मूर्च्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः।।

महर्षि पाणिनिना अस्मिन् सन्दर्भे प्रोक्तं वर्तते "तुमर्थाच्च भाववचनात्" २.३.१५ तुमर्थभाववचन प्रत्ययान्तात् प्रातिपदिकाच्चतुर्थी विभक्ति भवति। [11]
उदाहरणम् –

१. पाकाय ब्रजति।
२. त्यागाय ब्रजति।
३. भूतये ब्रजति।
४. यागाय याति।

अत्र "नमः स्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च" २.३.१६ सूत्रे एषां पदानां योगे चतुर्थी विभक्ति भवति। केषां पदानां नमः, स्वस्ति, स्वाहा, स्वधा, अलम्, वषट् इत्येतैर्योगैश्चतुर्थी विभक्तिः भवति। [12]

१. नमो देवेभ्यः
२. स्वस्ति प्रजाभ्यः

३. स्वाहा अग्नये।

वार्त्तिकोऽयं वर्तते – उपपदविभक्तेः कारकविभक्तिर्बलीयसी
उदाहरणम् – नमस्करोति देवान्। अत्र कारकविभक्तित्वात् कर्मसंज्ञा भवति।
उपपदविभक्तौ संप्रदानमेव

१. अग्नये स्वाहा।
२. पितृभ्यः स्वधा।
३. दैत्येभ्यो हरिरलं प्रभुः अलमिति पर्याप्त्यर्थ ग्रहणम्। साहित्यग्रन्थेऽपि उदाहरणं द्रष्टुं शक्यते।

क. नमस्तत्कर्मभ्यो विधिरपि न येभ्यः प्रभवति। [13]
ख. लम्मतलोमतलाय। [14]
ग. पर्याप्तो ह्येकः पुलाकः स्थाल्या निदर्शनाय। [15]

नमः इत्यादयः सूत्रे च अव्ययपदं समुच्चयार्थे वर्तते। आशिशि विभक्त्यां अत्र चतुर्थी

१. स्वस्ति गोभ्यो भूयात्।
२. अलम् – इति पदमनेकार्थे अस्ति।

१. अलम् – (निषेधारथे) अलं महीपाल तव श्रमेण। (रघुवंशम्)
२. शोभार्थे – श्रीमन्त आचार्यपदम् अलङ्कुर्वन्ति।
३. पर्याप्त्यर्थे – अलं रामय

मन्यकर्मण्यनादरे विभाषाऽप्राणिषु, अष्टाध्यायी २.३.१७। मन्यकर्मणि प्राणिवर्जिते विभाषा चतुर्थी विभक्ति भवति। अनादरे गम्यमाने।

१. न त्वां तृणाय मन्ये।
२. तृणाय मत्वा रघुनन्दनोऽपि बाणेन रक्षः प्रधनान् निरास्थत्। [16]
“गत्यर्थकर्मणि द्वितीया चतुर्थ्यौ चेष्टायामनध्वनि” २.३.१२। गत्यर्थानां धातुनां चेष्टाक्रियाणां परिष्पन्दक्रियाणां कर्मणि कारके अध्ववर्जिते द्वितीयाचतुर्थौ भवतः।

१. ग्रामाय गच्छति।
२. ग्रामाय व्रजति।

**नेपाली सम्प्रदानकारकम्**

नेपाली वृहद् व्याकरणस्य कारकप्रकरणस्य संप्रदानकारकेण लिखितमस्ति यद् – जसलाई केही दिइन्छ, वा चढाइन्छ त्यसलाई संप्रदान कारक भन्दछन्। [17] संस्कृतभाषायां उक्तपरिभाषानुवाद एवमस्ति – यं किञ्चिद्ददाति वा अर्पयति – तत् संप्रदानम्।
तद् द्विविधम् १. प्रेरकः, २. अप्रेरकश्च। [18]
प्रेरकः संप्रदानम् – जसले मलाई यो देऊ वा यति गरिदेऊ भन्छ त्यसलाई प्रेरक संप्रदान भनिन्छ। [19]
येन यस्मै ददाति वा मत्कृते एवं करोति स प्रेरक सम्प्रदानं भवति।
उदाहरणानि –

धनी गरीबलाई पैसा दिन्छ।
बाबु छोरालाई कोट दिन्छ
बहिनी धोबीलाई कपड़ा दिन्छे।
खेतालालाई ज्याला दिन्छ। [20]
छात्रलाई चन्दा दिन्छ।
घरपटीलाई भाड़ा दिन्छ इत्यादयः।[21]

अप्रेरकसंप्रदानम् – यमभिलक्ष्य वा देवमभिलक्ष्य अर्पयति तद् अप्रेरकं संप्रदानम्।
उदाहरणानि –

१. भक्त देवतालाई नैवेद्य चढ़ाउँछ।
२. छात्र गुरुलाई दक्षिणा दिन्छ।
३. साक्त देवतालाई बली दिन्छ इत्यादयः [22]

यो यस्मै ददाति। इत्यत्र स्वसत्व निर्वृत्ति पुरस्सरं परसत्तोत्पादनं दानम्। अत्र संप्रदानकारके कर्ता यस्मै धनं ददाति पुनस्तद्धनस्यापेक्षा न करोति। स कर्ता दीनाय वा दानाय धनं वितरति। तन्मम नास्ति इति विचिन्त्य तद् संप्रदानम्। नेपाली भाषायां एवं प्रकारकाणि वाक्यानि सन्ति तानि असंप्रदानकारकाणि ।
यथा-

नेपाल्याम् – त्यो धोबीलाई वस्त्र दिन्छ।
संस्कृत – स रजकाय वस्त्रं ददाति।
रामलाई पैसा सापटी दिन्छ।
रामाय धनं ददाति।

अत्र धनस्य पुनः संप्राप्ति भवतीति कर्तुरभिलाषा वर्तते। अनयोः वाक्ययोः संप्रदानस्य लक्षणं न घटति तथापि दा धातोः योगे संप्रदानं भवति। अत्रैव अशास्त्रीयमुदाहरणम्। परन्तु प्रयोगस्तु भवत्येव व्यवहारे।
अत्र महाभाष्यकारः पतञ्जति प्रोवाच “खण्डिकोपाध्यायचपेटां ददाति।” अत्र सत्तायाः निर्वृत्ति तथापि अत्र चतुर्थीविभक्तेः प्रयोगो वर्तते।
नेपाली व्याकरणे द्वितीया एवं चतुर्थी मध्ये ‘लाई’ प्रत्ययोऽस्ति। स प्रत्यय द्वितीयायां प्रायेण (दबिन्छ) गौण भवति। चतुर्थीकारके प्रधानरुपो भवति। द्वितीयाकारके इयं “लाई” विभक्ति गौण अस्ति। उदाहरणानि-

१. श्याम भाई हेर्छ। श्याम भाईलाई हेर्छ।
२. किसान खेत खन्छ, किसान खेतलाई खन्छ।

द्वितीयायां प्रमुखस्थानानि त्रीणि सन्ति। यत्र ‘लाई’ प्रत्ययस्य योगो भवति।
यथा –

क. साधारण कर्म
ख. पुरक कर्म
ग. प्रयोज्य कर्म

उत्तरकालिक क्रियायाः गौढत्वे सति तद्क्रियायाः कर्म संप्दानत्वाद् चतुर्थी भवति। [23]
यथा –

१. पूजा (गर्न) लाई सामान किन्छ।
२. काम (गर्न) लाई आएँ।
३. गाई (किन्न) लाई जाऊ।
४. पूजा (गर्न) लाई चन्दा दिन्छ।
५. घाऊलाई (निको पार्न) औषधी दिन्छ।

नेपाली व्याकरणे भन्नु, सोध्नु, डाड्नु, गर्नु एषु धातुषु अप्रधानकर्माणां संप्रदानसंज्ञा भवति। [24]
यथा-

१. बालाई यो कुरा भन्छु।
२. गुरुलाई यो कुरा सोध्छु।
३. अदालतले अपराधीलाई पाँच सय रुपियाँ डाँड्यो।

एषु च संप्रदानत्वात् चतुर्थी भवति। मन पर्नु, रुच्नु, निको लाग्नु, चाहिनु, एषु अर्थेषु धातुनां प्रयोगे यं यं क्रिया भवति तत्र चतुर्थी स्यात् [25]
उदाहरणानि –

१. मलाई किताब मन पर्छ।
२. आज मलाई भात खुब रूच्छ।
३. त्यसलाई घुमफिर गर्न निको लाग्छ।
४. भाईलाई उपचार चाहिन्छ।

ठिक्क हुनु, पुग्नु, केही कुरा गाउनु, मिल्नु (अर्थ बुझिएमा) एषु अर्थेषु च चतुर्थी विभक्ति स्यात्। [26]

१. योटोपी मलाई ठिक्क हुन्छ।
२. मलाई भात पुग्छ।
३. भाईलाई इज्जत मिलेको छ।
४. गोपाल गाउन आउँछ।
५. मलाई फुर्सत छैन इत्यादयः।

उक्तार्थेषु केषुचित् स्थलेषु षष्ठी स्थाने सम्बन्ध्यत्र गौढत्वे सति चतुर्थी विभक्ति भवति। [27]

सक्नु धातोः योगे न प्रत्ययान्तानां अव्ययानां पदानां वा चतुर्थी स्यात्।
यथा – म त्यहाँ जानलाई सक्छु। (जान सक्छु)
म यति काम गर्नलाई सक्छु (काम गर्न सक्छु)
आवश्यक योग्य अनयोरर्थयोः प्रयोगे (जसलाई यो हुन्छ) चतुर्थी भवति।
यथा – भाईलाई पुस्तक आवश्यक छ।
श्यामलाई त्यो काम योग्य छ।
लाग्नु, हुनु, उठ्नु, आदिनां धातुनां प्रयोगे (यी क्रिया कर्ताले) जानसँग सम्बन्ध राख्छ।
कर्तुः येन सह सम्बन्धो वर्तते तत्रापि चतुर्थी विभक्ति भवति।
यथा –

मलाई भोक लाग्यो।
मलाई निन्द्रा लागेको छ।
आमालाई पिर लाग्छ।
मलाई दुःख लाग्छ।
त्यसलाई दुःख लाग्छ। इत्यादयः।

चिलाउनु दुःख्नु आदिनां धात्वादिनां प्रयोगे पदेषु भवन्ति तेभ्यः चतुर्थी स्युः।
त्यसलाई चिलाउँछ।
मलाई दुःख। [28]
चिलाउनु, दुःख्नु आदिनां धातुनां प्रयोगे कर्तामा प्रयोग अस्ति चेत् तस्य सम्बन्धी बोधयति चेत् षष्ठी विभक्ति भवति।
उदाहरणानि- त्यसको आँखा दुख्छ।
मेरो कान चिलाउँछ। [29] सूत्र संख्या ४९७ मध्ये दया, माया, तृप्ति, भोक, प्यास, रिस (एतेषां भावे कर्तृत्वाश्रयतत्वात् चतुर्थी विभक्ति भवति) आदि भाव कर्ता बनेकोले ती भावका आश्रयदेखि चतुर्थी विभक्ति भएको छ।
केचित् – भावाश्रयलाई नै कर्ता सम्झी कर्तामा चतुर्थी भएको हो भन्छन् नोऽयमुचितः।

तिमी मलाई मनाउँछौ (प्रिय लाग्दो)
बहिनी मलाई मन पर्छ। येषु वाक्येषु
कर्ता – बहिनी
मलाई भावाश्रय
मनपर्छ – क्रिया।
मलाई बहिनी मन पर्छे।
मलाई – भावाश्रय (कर्ता सम्झेर)
कर्तामा चतुर्थी भएको भन्छन्। त्यो होइन।
अत्र क्रियान्वयित्वं कारकत्वम्। इयं लक्षणा न घटति।
दया माया, तृप्ति, भोक, प्यास, रिस, इत्यादिषु स्थलेषु भाव कर्ता अस्ति।
तस्माद्भावाश्रयाद् चतुर्थी विभक्ति वर्तते। [30]

उदाहरणानि – मलाई भोक लाग्छ।
केचित् - भावाश्रय एवं कर्ता अस्तीति मत्वा कर्तायां चतुर्थी विभक्ति अस्ति इति स्वीकुर्वन्ति उदाहरणम्।

१. मलाई बहिनी मन पर्छ।

अत्र भाव वर्तते बहिनी भाव वर्तते मलाई क्रियापदमस्ति – मन पर्छ।
भावाश्रय कर्ता न भवति भावेन कर्ता अस्ति अस्मिन् वाक्ये। [31]
जसका निमित्त केही काम गरिन्छ त्यसदेखि चतुर्थी विभक्ति हुन्छ।
यमभिलक्ष्य किञ्चित् कार्यं करोति चेत् तस्मात् चतुर्थी भवति।
यन्निमित्तम्, तादर्थ्य, चतुर्थी इति।

१. घरलाई/घरका लागि काठ किन्छु।
२. पढ्नलाई वा पढनको निम्ति
३. किताब घर लैजान्छ।
४. घोड़ालाई दाना छैन
५. बालाई चिट्ठी लेख्छु।

नु प्रत्ययान्त कृदन्तक्रियाको अनुक्त कर्तामा विकल्पले चतुर्थी हुन्छ।
नु प्रत्ययान्त कृदन्तक्रियायां अनुक्ते कर्तरि चतुर्थी स्यात्।

उदाहरणम् –
१. मलाई घरमा गएर लेख्नु छ।
२. अधिकारीहरूलाई कार्यालय गएर धेरै काम गर्नुपर्छ।
३. अन्यत्र तृतीया एवं षष्ठी विभक्ति भवति।

मलाई, मैले, मेरो इत्यादयः।
कुनै क्रियाको फललाई कारण बनाएमा कार्यवाचक शब्ददेखे तृतीया र निमित्त बनाएमा चतुर्थी विभक्ति हुन्छ।
कुत्रचित् क्रियाफलस्य कारणे सति कार्यवाचकशब्देषु तृतीया विभक्ति आगच्छति।
उदाहरणानि – (कारण बनाएमा)
भिनाले (गर्दा), कस्तुरी मारिन्छ।
दाँतले (गर्दा) हात्ती मर्छ।
खागले (गर्दा) गैंडा मर्छ। करणे तृतीया भवति।
निमित्तमात्रौ चतुर्थी विभक्ति भवति।
उदाहरणानि –
१. भिनालाई कस्तुरी मारिन्छ।
२. खागलाई गैड़ा मार्दछन्।
३. दाँतलाई हात्ती मार्दछन्। [32]

स्वस्ति, कल्याण, हित, सुख, नमः आदि शब्दहरूको प्रयोग भएमा जसका निमित्त यी कुराको कामना वा प्रयोग गरिन्छ त्यसदेखि चतुर्थी हुन्छ।
स्वस्ति, कल्याण, हित, सुख, नमः एभिर्योगे चतुर्थी स्यात्।
उदाहरणानि-
१. राजलाई स्वस्ति।
२. उनीमा कल्याण होला।
३. सबैलाई हित होस्।
४. सबैलाई सुख होस्।
५. तपाईलाई नमस्कार छ। इत्यादि।

स्वस्ति, कल्याण, हित, सुख, नमः योगे षष्ठी। [33]
गौण कर्मणि अस्मिन् सम्प्रदाने (सित, सँग) अनयोः अव्ययोः विकल्पेन प्रयोगो भवति।
१. बाहालाई/सँग/सित यो कुरा भन।
२. मलाई /सँग/सित यो कुरा भन।

३. केषुचिद्स्थानेषु एकस्मिन् वाक्ये संप्रदान चतुर्थी वा निमित्त (तादर्थ्य) चतुर्थी गरी दुई चतुर्थ्यन्त परिरहन्छन्।

यथा देश सेवालाई पृथ्वीनारायण शाहलाई शूर प्रभाले आफ्ना छोराहरूलाई सुम्पिन्।
माल ल्याउनलाई कालेलाई समाचार देऊ।
अस्मिन् वाक्ये संप्रदानमेव निमित्तम्। उभयोः भावे एकस्मिन् वाक्ये अस्ति।
लाभकसंप्रदानम्।

१. सत्वद्वारा लाभान्वित हुने सहभागीलाई यहाँ लाभक मानिएको छ।[34]

उदाहरणानि- आङ्गल व्याकरणकार प्लाटले १९८१-५१ मध्ये वर्णितमस्ति। कर्मसंप्रदानयोः लाई प्रत्यय अधिगच्छति। अत्र लाई प्रत्यय अभिनत्वात् (किं क्रियते) इति प्रश्ने अन्वये सति सु कर्म। कस्मै क्रियते? इति प्रश्ने अन्वय भवति चेत् तद् संप्रदानम्।
उदाहणम् – राम खानालाई रामचन्द्रलाई डाक्छ। क आह्वयति रामः, कस्मै आह्वयति भोजराजाय इत्यत्र राम कर्तृक भोजनसंप्रदानिक निमन्त्रणानुकूलव्यापारः।[35] इति नियम वर्तते।

**संदर्भ सूची**


1. परमलघुमञ्जुषा पृष्ठ संख्या २७३
2. सिद्धान्तकौमुदी (लक्ष्मीटीका) कारकप्रकरणम् पृष्ठ संख्या ८१३
3. श्रीमद्भगवद्गीता २.७
4. महाभारत ९.३१.३३
5. पूर्वमीमासा अ. ४
6. सिद्धान्तकौमुदी लक्ष्मीटीका पृष्ठ ८१४
7. सिद्धान्तकौमुदी लक्ष्मीटीका पृष्ठ ८१८
8. सिद्धान्तकौमुमी लक्ष्मीटीका पृष्ठ ८१९
9. सिद्धान्तकौमुमी लक्ष्मीटीका पृष्ठ ८१९
10. सिद्धान्तकौमुमी लक्ष्मीटीका पृष्ठ ८१९
11. काशिका जयादित्या. पृष्ठ ३०१
12. काशिका पृष्ठ ३०१
13. भर्तृहरि नीति ९१
14. काशिका
15. महाभारत १.४.२३
16. भट्टिकाव्य (लक्ष्मीटीका ८२३)
17. नेपाली बृहद्व्याकरण पृष्ठ ४७९
18. नेपाली बृहद्व्याकरण पृष्ठ ४७९
19. नेपाली बृहद्व्याकरण पृष्ठ ४७९
20. नेपाली बृहद्व्याकरण पृष्ठ ४७९
21. नेपाली बृहद्व्याकरण पृष्ठ ४७९
22. नेपाली बृहद्व्याकरण पृष्ठ ४७९
23. नेपाली बृहद्व्याकरण पृष्ठ ४७९
24. नेपाली बृहद्व्याकरण पृष्ठ ४८०
25. नेपाली बृहद्व्याकरण पृष्ठ ४८०
26. नेपाली बृहद्व्याकरण पृष्ठ ४८१
27. नेपाली बृहद्व्याकरण पृष्ठ ४८१
28. नेपाली बृहद्व्याकरण पृष्ठ ४८२
29. नेपाली बृहद्व्याकरण पृष्ठ ४८१
30. बृहत् नेपाली व्याकरण, पृष्ट ४८२
31. बृहत् नेपाली व्याकरण, पृष्ट ४८२
32. बृहद् नेपाली व्याकरण, पृष्ठ ५८३
33. बृहद् नेपाली व्याकरण, पृष्ठ ५८३
34. हेमाङ्गराज अधिकारी, पृष्ठ संख्या १३९
35. चन्द्रिका पष्ठ संख्या ९७६